श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीसन्निधि तनियन् श्लोकाः ॥


*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***


*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीसन्निधि तनियन् श्लोकाः ॥

कमप्याद्यं गुरुं वन्दे कमलागृहमेधिनम्।
प्रवक्ता छन्दसां वक्ता पञ्चरात्रस्य यस्स्वयम्॥ १ ॥

सहधर्मचरीं शौरेस्संमन्त्रितजगद्धिताम्।
अनुग्रहमयीं वन्दे नित्यमज्ञातनिग्रहाम्॥ २ ॥

वन्दे वैकुण्ठसेनान्यं देवं सूत्रवतीसखम्।
यद्वेत्रशिखरस्पन्दे विश्वमेतद्व्यवस्थितम्॥ ३ ॥

यस्य सारस्वतस्रोतो वकुळामोदवासितम्।
श्रुतीनां विश्वमायालं शठारिं तमुपास्महे॥ ४ ॥

नाथेन मुनिना तेन भवेयं नाथवानहम्।
यस्य नैगमिकं तत्त्वं हस्तामलकतां गतम्॥ ५ ॥

नमस्याम्यरविन्दाक्षं नाथभावे व्यवस्थितम्।
शुद्धसत्त्वमयं शौरेरवतारमिवापरम्॥ ६ ॥

अनुज्झितक्षमायोगमपुण्यजनबाधकम्।
अस्पृष्टमदरागं तं रामं तुर्यमुपास्महे॥ ७ ॥

विगाहे यामुनं तीर्थं साधुबृन्दावने स्थितम्।
निरस्तजिह्मगस्पर्शे यत्र कृष्णः कृतादरः॥ ८ ॥

दयानिघ्नं यतीन्द्रस्य देशिकं पूर्णमाश्रये।
येन विश्वसृजो विष्णुरपूर्यत मनोरथः॥ ९ ॥

www.prapatti.com

यो नित्यमच्युतपदांबुजयुग्मरुक्म-
व्यामोहतस्तदितराणि तृणाय मेने।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः
रामानुजस्य चरणौ शरणं प्रपद्ये॥ १० ॥

रामानुजपदच्छाया गोविन्दाह्वानपायिनी।
तदायत्तस्वरूपा सा जीयान्मद्विश्रमस्थली॥ ११ ॥

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे॥ १२ ॥

नमो वेदान्तिवेद्याय जगन्मङ्गळहेतवे।
यस्य वागमृतासारपूरितं भुवनत्रयम्॥ १३ ॥

वेदान्तिवेद्यामृतवारिराशेः
वेदार्थसारामृतपूरमग्र्यम्।
आदाय वर्षन्तमहं प्रपद्ये
कारुण्यपूर्णं कलिवैरिदासम्॥ १४ ॥

श्रीकृष्णपादपादाब्जे नमामि शिरसा सदा।
यत्प्रसादप्रभावेन सर्वसिद्धिरभून्मम॥ १५ ॥

श्रीकृष्णपादपादाब्जलोलुपं सद्गुणार्णवम्।
श्रीरङ्गार्यमहं वन्दे द्रामिडाम्नायदेशिकम्॥ १६ ॥

श्रीरङ्गार्यगुरोस्सूनुं धीशमादिगुणार्णवम्।
केशवार्यमहं वन्दे द्रामिडाम्नायदेशिकम्॥ १७ ॥

केशवार्यगुरोस्सूनुं धीशमादिगुणार्णवम्।
श्रीनिवासगुरुं वन्दे द्रामिडाम्नायदेशिकम्॥ १८ ॥

श्रीरङ्गराजदिव्याज्ञालब्धसाम्राज्यलाञ्छनम्।
गुरुं द्रमिडवेदानां केशवार्यमुपास्महे॥ १९ ॥



www.prapatti.com

केशवार्यकृपापात्रं धीशमादिगुणार्णवम्।
श्रीशठारियतीशानं देशिकेन्द्रमहं भजे॥ २० ॥

प्रपद्ये निरवद्यानां निषद्यां गुणसंपदाम्।
शरणं भवभीतानां शठकोपमुनीश्वरम्॥ २१ ॥

श्री शठारियतीशान पदपङ्कजषट्पदम्।
श्रीमन्नारायणमुनिं श्रये श्री भाष्यदेशिकम्॥ २२ ॥

श्रीमन्नारायण मुनेः पद पङ्कजषट्पदम्।
पराद्धर्यगुणसंपन्नं पराङ्कुशमुनिं भजे॥ २३ ॥

श्री पराङ्कुशयोगीन्द्र चरणांबुजषट्पदम्।
श्रीनिवासमुनिं वन्दे श्रीभाष्यामृतसागरम्॥ २४ ॥

श्रीनृसिंह दयापात्रं परवादिगजाङ्कुशम्।
सर्वतन्त्रस्वतन्त्रार्यं शठकोपमुनिं भजे॥ २५ ॥

श्रीमच्छठारि मुनिपाद सरोजहंसं
  श्रीमत्पराङ्कुश तपोधन लब्धबोधम्।
श्रीमन् नृसिंह वरदार्य दयावलम्बं
  श्रीमत्पराङ्कुशमुनिं प्रणतोऽस्मि नित्यम्॥ २६ ॥

श्रीपराङ्कुशयोगीन्द्र चरणाबुजशेखरम्।
समस्तशास्त्रपारीणं शठकोपमुनिं भजे॥ २७ ॥

शठकोपयतिश्रेष्ठ पदपङ्कजषट्पदम्।
सर्वशास्त्रार्थतत्त्वज्ञं पराङ्कुशमुनिं भजे॥ २८ ॥

शठारिनारायणसंयमीन्द्र
  पराङ्कुश श्रीनिधि वण्शठारीन्।
पराङ्कुश श्रीशठकोपयोगि
  पराङ्कुशांश्चादिगुरून् भजामः॥

श्रीमन् नृसिंहवरद पराङ्कुश कृपाश्रयम्।
श्रीमन्नारायणमुनिं श्रये श्रीभाष्यदेशिकम्॥ २९ ॥

वरदार्यगुरूत्तंस चरणाम्बुजषट्पदम्।
शठकोपमुनिं वन्दे शठारिप्रवणं सदा॥ ३० ॥

पराङ्कुश शठाराति पदाम्बोजैक धारकम्।
श्रीनिवासमुनिं वन्दे मादृशामपि तारकम्॥ ३१ ॥

श्रीपराङ्कुश योगीन्द्र श्रीनिवासपदाश्रयम्।
श्रीमन्नारायणमुनिं वन्दे वेदान्तदेशिकम्॥ ३२ ॥

श्रीमन्नारायणमुनेः पदपङ्कजहंसकम्।
वीरराघवयोगीन्द्रं वन्दे वरगुणाकरम्॥ ३३ ॥

प्रणम्य नारायण वण्शठद्विषद्-
रमानिवासाननघान् मुनीश्वरान्।
नमामि नारायणयोगितल्लजं
तदादिमं वीररघूद्वहं गुरुम्॥

श्री वीरराघवमुनेर्वरिवस्यैक जीवनम्।
समाश्रयेमहि श्रीमन्नारायण मुनीश्वरम्॥ ३४ ॥

श्रीनारायण योगीन्द्र पदाम्बोजैक जीवनम्।
भजे श्रीरङ्गकल्याण वीरराघव योगिनम्॥ ३५ ॥

कल्याणराघवमुनेः कृपापात्रं दयानिधिम्।
सर्वशास्त्रार्थ तत्त्वज्ञं शठकोपमुनिं भजे॥ ३६ ॥

श्रीमन्नारायणमुनिं श्रीशठारिपदाश्रयम्।
श्री वीरराघवमुनिं वन्दे वेदान्तदेशिकम्॥ ३७ ॥

वीरराघव वेदान्त मुनिवर्य पदाश्रयम्।
श्रीमन्नारायणमुनिं श्रये श्रीभाष्यदेशिकम्॥ ३८ ॥

श्रीमन्नारायण मुनेः पदपद्मसमाश्रयम्।
श्रीनिवासमुनिं वन्दे वेदान्तद्वयदेशिकम्॥ ३९ ॥

श्रीनिवास मुनिश्रेष्ठाल्लब्धवेदान्तसंपदम्।
श्री वीरराघवमुनिं कल्याणगुणमाश्रये॥ ४० ॥

वेदान्तोत्तर वीरराघव मुनेर्नारायण श्रीनिधि-
श्रीमद्वीररघूद्वहाख्य यमिनां कल्याणवीक्षास्पदम्।
विज्ञातोभय वेदमौळिहृदयं विद्वच्छिरोभूषणं
वन्देयानुदिनं पराङ्कुशमुनिं वैराग्यभक्त्यन्वितम्॥ ४१ ॥

विद्याम्बोधि पराङ्कुशाख्य मुनिराडङ्घ्रिद्वयीसंश्रितं
त्रय्यन्तामृत वर्षिणं तनुभृतां त्राणाय जातोदयम्।
क्षोण्यां ख्यातसमस्ततन्त्रकुशलं व्याख्यातृताशालिनं
श्रीनारायण योगिवर्यं अनिशं कारुण्यपूर्णं भजे॥ ४२ ॥

वीरराघव वेदान्त नारायण पदाश्रयम्।
श्रीवीरराघवमुनिं संश्रये श्रितवत्सलम्॥ ४३ ॥

श्रीवीरराघवमुनिं श्रुतिमौळिसूरि-
श्रीमत्पदाम्बुज समाश्रय लब्धसत्त्वम्।
श्रीवीरराघवमुनीन्द्र कृपावलम्बं
श्रीमत्पराङ्कुश यतीन्द्र मुनिं भजामः॥ ४४ ॥

श्री नारायण कल्याणवीरराघवयोगिनौ।
शठजिद् वीररघुराट् वेदमौळिमुनीश्वरौ॥

नारायण श्रीनिवास वीरराघवयोगिनः।
पराङ्कुशमुनि श्रीमन्नारायणमुनीश्वरौ॥

वीरराघवयोगीन्द्रं वीतरागशिखामणिम्।
पराङ्कुशयतीशानमुनिं चानिशमाश्रये॥

श्रीवासवीररघुवर्यपराङ्कुशादि
रामानुजार्यमुनिभिर्गुरुसार्वभौमैः।
संप्रेक्षितं करुणया परिपूर्णबोधं
श्रीश्रीनिवासयतिशेखरमाश्रयामः॥ ४५॥

श्रीवीरराघव यतीन्द्र पराङ्कुशादि
रामानुजार्यकमलानिधि योगिवर्यैः।
संप्रेक्षितं करुणया परिपूर्णबोधं
श्रीरङ्गनाथयतिशेखरमाश्रयामः॥ ४६॥

श्रीश्रीनिवासयतिशेखरलब्धबोधं
श्रीरङ्गनाथयतिधुर्यपदाब्जभृङ्गम्।
श्रीवीरराघवमुनिश्रुतिमौळिसूरिं
श्रीनाथभक्तिभरिताशयमाश्रयामः॥ ४७॥

श्रीवासरङ्गपतिवीररघूद्वहादी
वेदान्तसंयमिवरैर्गुरुसार्वभौमैः।
संप्रेक्षितं करुणया परिपूर्णबोधं
श्रीरङ्गनाथशठकोपमुनिं भजामः॥ ४८॥

विद्यांभोधिपराङ्कुशाख्ययतिराट् श्रीवासरङ्गाधिप-
श्रीमद्वीररघूद्वहश्रुतिशिरो योगीश्वरैरन्वहम्।
रङ्गाधीशशठारिसंयमिवरैश्चालोकितं सादरं
विद्यावारिनिधिं पराङ्कुशयतीन्द्राख्यं मुनीन्द्रं भजे॥ ४९॥

श्रीवासरङ्गपतिवीररघूद्वहादि-
वेदान्तदेशिकपराङ्कुशलक्ष्मणार्यैः।
संप्रेक्षितं करुणयापरिपूर्णबोधं
श्रीश्रीनिवासनिगमान्तगुरुं भजामः॥ ५०॥

श्रीरङ्गनाथयतिवर्यकृपात्तबोधं
श्रीवासवेदशिखरार्यदयावलंबम्।

वैराग्यभक्तिमुखसद्गुणसागरं श्री-
नारायणश्रुतिशिरोगुरुमाश्रयामः॥ ५१ ॥

श्रीवासरङ्गपतिवीररघूद्वहादि
वेदान्तमानिलयवेदशिरोयतीन्द्रैः।
संप्रेक्षितं करुणया परिपूर्णबोधं
श्रीवीरराघवयतीन्द्रगुरुं भजामः॥ ५२ ॥

श्रीरङ्गनाथशठकोपयतीन्द्रपाद-
पङ्केरुहप्रवणचित्तमुदारबोधम्।
श्रीवीरराघवयतीन्द्रकृपावलम्बं
श्रीमच्छठारियतिवर्यगुरुं भजामः॥ ५३ ॥

श्रीमद्वीररघूद्वहश्रुतिशिरोरङ्गेशकार्यात्मज-
श्रीवासश्रुतिमौळियोगिशठजिद्योगीशवीक्षास्पदम्।
विख्यातं शमधीदमादिसुगुणैराढ्यं विपश्चित्तमं
वन्दे श्रीशठकोपलक्ष्मणमुनिं वैराग्यवाराकरम्॥ ५४ ॥

श्रीमच्छ्रीवीररघ्वीट्श्रुतिमकुटगुरूत्तंसपादाब्जभृङ्गं
श्रीमच्छ्रीरङ्गभूभृच्छठमथनगुरोर्लब्धवेदान्तयुग्मम्।
श्रीमन्नारायणाद्यश्रुतिशिखरशठारातिरामानुजार्य-
प्रेक्षापात्रं भजामो गुरुवरमनघं रङ्गनाथं यतीन्द्रम्॥ ५५ ॥

श्रीनारायणवेदमौळियतिराट् पादारविन्दाश्रयं
ख्यातश्रीशठकोपदेशिकमणेर्लब्धागमान्तद्वयम्।
श्रीमद्रङ्गधुरीणयोगिचरणन्यस्तात्मरक्षाभरं
सेवे श्रीनिधियोगिवर्यमनघं निर्बाधबोधोदयम्॥ ५६ ॥

अस्त्यत्रैको विशेषो बुध इति शठजिल्लक्ष्मणाभ्यां मुनिभ्यां
एकीभूयोदिताभ्यामिव निरुपधिकं सादरं सद्गुरुभ्याम्।
वेदान्तद्वन्द्वमन्त्रत्रयविवृतिमुखे शिक्षितं क्षान्तिमुख्यैः
आढ्यं श्रीवीररघ्वीट् शठमथनगुरुं सम्यमीन्द्रं भजामि॥ ५७ ॥



www.prapatti.com

श्रीमच्छठारिशठजिद्यतिधुर्यवीर-
रघ्वीट्शठारियतिशेखरदेशिकेन्द्रैः।
संप्रेक्षितं करुणया परिपूर्णबोधं
श्री श्रीनिवासशठकोपमुनिं भजामः॥ ५८ ॥

श्रीवीरराघवयतीन्द्रपदाब्जभृङ्गं
श्रीमच्छठारियतिवर्यकृपात्तबोधम्।
श्रीश्रीनिवासशठजिद्यतिधुर्यवीक्षा-
पात्रं पराङ्कुशयतीन्द्रगुरुं भजामः॥ ५९ ॥

श्रीमच्छठारियतिशेखरलब्धबोधं
श्रीरङ्गनाथयतिधुर्यकृपैकपात्रम्।
श्रीमत्पराङ्कुशयतीन्द्रदयावलम्बं
श्रीरङ्गनाथशठकोपमुनिं भजामः॥ ६० ॥

श्रीमच्छठारिशठकोपयतीन्द्ररङ्गि-
कार्यात्मजातमुनिभिर्गुरुसार्वभौमैः।
संप्रेक्षितं करुणया परिपूर्णबोधं
लक्ष्मीनृसिंहशठकोपमुनिं भजामः॥ ६१ ॥

श्रीरङ्गेशयतीन्दुना करुणयाऽसौ स्यादिति प्रेक्षितं
ख्यातश्रीनरसिंहकारिजमुनीट्पादांबुजेन्दिन्दिरम्।
दान्तिक्षान्तिदयादिभिः शुभगुणैर्भान्तं बुधाग्रेसरं
श्रीमद्रङ्गशठारियोगिनृपतिं श्रेयोनिधिं संश्रये॥ ६२ ॥

श्रीमच्छ्रीरङ्गपृथ्वीश्वरशठरिपुणा संयमीन्द्रेण दृष्टं
न्यस्तात्मानं नृसिंहे नरहरिशठजिद्योगिनेतुः प्रसादात्।
प्राज्ञश्रीरङ्गकारिप्रभवयतिपतेः प्राप्तलक्ष्मीनृसिंहा-
स्थानं सेवे यतीन्द्रं सकलगुणनिधिं वीररघ्वीट् शठारिम्॥ ६३ ॥

श्रीरङ्गनाथशठकोपयतीन्द्रदृष्टं
लक्ष्मीनृसिंहशठजित्करुणैकपात्रम्।

श्रीरङ्गवीररघुराट्शठकोपहृद्यं
वेदान्तदेशिकयतीन्द्रमहं प्रपद्ये॥ ६४ ॥

श्रीमद्रङ्गशठारि संयमिवराल्लब्धागमान्तद्वयम्
श्रीमद्वीररघूद्वहाद्यशठजित्पादारविन्दाश्रयम्।
श्रीमद्वेदवतंसदेशिकयतेः कारुण्यवीक्षास्पदम्
सेवे रङ्गधुरीणशासनवशं नारायणं योगिनम्॥ ६५ ॥

वेदान्त देशिक यतीन्द्र कटाक्षलब्ध
त्रय्यन्त सारमनवद्य गुणं बुधाग्र्यम्।
नारायणाद्य यतिधुर्य कृपाभिषिक्तम्
श्रीरङ्गनाथ यतिशेखरमाश्रयाम॥ ६६ ॥

॥ श्रीमते श्रीलक्ष्मीनृसिंह दिव्यपादुकासेवक
श्रीवण् शठकोप श्री नारायणयतीन्द्रमहादेशिकाय नमः॥

www.prapatti.com